শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

সেৱা শ্রী শ্রীনিৱাসরাঘৱার্য মহাদেশিক ৱিরচিতং

# ॥ শ্রী সৌভাগ্যলক্ষ্মী সুপ্রভাতম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী সৌভাগ্যলক্ষ্মী সুপ্রভাতম্ ॥

ভানুঃ স্বকীযকিরণৈঃ প্রতিবোধনার্থং
ভক্ত্যোপতিষ্ঠতি সুমেরিব পদ্মিনীং ৎৱাম্।
ক্ষীরোদশাযিভগৱদ্ হৃদযাভিরামে
উত্তিষ্ঠ মঙ্গলকরে তৱ সুপ্রভাতম্ ॥ 1 ॥

ত্রৈলোক্যমেৱ ভৱদীযকটাক্ষসিদ্ধ্যৈ
নক্তন্দিৱং প্রযততে প্রণমত্যজস্রম্।
ভানুঃ কুলাচলশিখামধিতিষ্ঠতি দ্রাক্
উত্তিষ্ঠ দেৱি পরমে তৱ সুপ্রভাতম্ ॥ 2 ॥

সন্তোষসৌধনিলযে শুভহর্ম্যৱাসে
পূর্ৱাচলস্য শিখরং তরণৌ প্রপন্নে।
উদ্যোগশালিনি জনে সুখশাযিনি ৎৱং
উত্তিষ্ঠ দেৱি মহিতে তৱ সুপ্রভাতম্ ॥ 3 ॥

তূর্ণং খগাস্তরুলতাদিনিৱাসভাজঃ
তন্দ্রাং ৱিহায চ মিথঃ সুকৃতারৱারাঃ।
ৱিষ্ণোঃ পদে সততসঞ্চরণেন ধন্যাঃ
উত্তিষ্ঠ দেৱি কমলে তৱ সুপ্রভাতম্ ॥ 4 ॥

ভাগ্যপ্রদানকুশলে জনভাগধেযাৎ
বিল্ল্ৱোজ্জ্ৱলে পুরৱরে কৃতসন্নিধানে।
সৌভাগ্যলক্ষ্মি ! জনরক্ষণনিত্যদীক্ষে
উত্তিষ্ঠ দেৱি কমলে তৱ সুপ্রভাতম্ ॥ 5 ॥

পুণ্যং সমস্তজগতাং ভৱতি প্রভাতং
ৎৱদ্বীক্ষণং পরমভাগ্যৱশেন লব্ধম্।
যৈরেৱ ভাগ্যপুরৱাসিনি কোমলাভে
উত্তিষ্ঠ দেৱি কমলে তৱ সুপ্রভাতম্॥ **6**॥

নাথপ্রিযে সকললোকনিনাদতৃপ্তে
নাদপ্রিযে সুভগমঙ্গলৱাদ্যজুষ্টে।
ৱৎসপ্রিযে সকলভক্তবন্ধুপ্রিযে ৎৱং
দেৱি প্রিযেণ ভৱতাৎ তৱ সুপ্রভাতম্॥ **7**॥

নিদ্রাসি নৈৱ পরমে পরমেণ সাকং
নিদ্রাভিনীতিরথৱা ভৱতু প্রকামম্।
পূর্ৱোত্থিতিং তৱ গৃণন্তি শুভাং মহান্তঃ
তস্মাদ্রমে ভৱতু সংপ্রতি সুপ্রভাতম্॥ **8**॥

কল্যাণমণ্ডপতলে কৃতনিশ্চিতার্থাঃ
সংবন্ধিনঃ প্রমুদিতাঃ সুকৃতারৱারাঃ।
সর্ৱে মিথঃ প্রণযভাষণতঃ প্রবুদ্ধাঃ
সৌভাগ্যলক্ষ্মি নিযতং তৱ সুপ্রভাতম্॥ **9**॥

ইত্থং প্রভাতসমযে তৱ সুপ্রভাতং
সৌভাগ্যলক্ষ্মি পুরতঃ কলযন্তি যে ৱা।
শান্তিং সুখং সফলতাং দৃঢতাং লভন্তাং
ভক্তিং যশশ্চ ৱিপুলং ভুৱি পূর্ণকামাঃ॥ **10**॥

॥ ইতি শ্রী সৌভাগ্যলক্ষ্মী সুপ্রভাতং সমাপ্তম্॥